# shAstuH dhyAnAShTakaM

# શાસ્તુઃ ધ્યાનાષ્ટકમ્

## Document Information

Text title : shAstuHdhyAnAShTakam

File name : shAstuHdhyAnAShTakam.itx

Category : deities_misc, ayyappa, aShTaka, dhyAnam

Location : doc_deities_misc

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, Sunder Hattangadi

Description/comments : From Shastrarchana, Kannada publication

Latest update : July 10, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શાસ્તુઃ ધ્યાનાષ્ટકમ્

શ્રીગણેશાય નમઃ ।
નમામિ ધર્મશાસ્તારં યોગપીઠસ્થિતં વિભુમ્ ।
પ્રસન્નં નિર્મલં શાન્તં સત્યધર્મવ્રતં ભજે ॥ ૧॥

આશ્યામકોમલવિશાલતનું વિચિત્ર-
વાસો વસાનમરુણોત્પલવામહસ્તમ્ ।
ઉત્તુઙ્ગરત્નમુકુટં કુટિલાગ્રકેશં
શાસ્તારમિષ્ટવરદં શરણં પ્રપદ્યે ॥ ૨॥

હરિહરશરીરજન્મા મરકતમણિભઙ્ગમેચકચ્છાયઃ ।
વિજયતુ દેવઃ શાસ્તા સકલજગચ્ચિત્તમોહિનીમૂર્તિઃ ॥ ૩॥

પાર્શ્વસ્થાપત્યદારં વટવિટપિતલન્યસ્તસિંહાસનસ્થમ્ ।
શ્યામં કાલામ્બરં ચ શ્રિતકરયુગલાદર્શચિન્તામણિં ચ ।
શસ્ત્રી નિસ્ત્રિંશબાણાસનવિશિખધૃતં રક્તમાલ્યાનુલેપં
વન્દે શાસ્તારમીડ્યં ઘનકુટિલબૃહત્કુન્તલોદગ્રમૌળિમ્ ॥ ૪॥

સ્નિગ્ધારાલવિસારિકુન્તલભરં સિંહાસનાધ્યાસિનં
સ્ફૂર્જત્પત્રસુકૢપ્તકુણ્ડલમથેષ્વિષ્વાસભૃદ્દોર્દ્વયમ્ ।
નીલક્ષૌમવસં નવીનજલદશ્યામં પ્રભાસત્યક-
સ્વાયત્પાર્શ્વયુગં સુરક્તસકલાકલ્પં સ્મરેદાર્યકમ્ ॥ ૫॥

કોદણ્ડં સશરં ભુજેન ભુજગેન્દ્રાભોગભાસા વહન્
વામેન ક્ષુરિકાં વિપક્ષદલને પક્ષેણ દક્ષેણ ચ ।
કાન્ત્યા નિર્જિતનીરદઃ પુરભિદઃ ક્રીડત્કિરાતાકૃતેઃ
પુત્રોઽસ્માકમનલ્પનિર્મલયશાઃ નિર્માતુ શર્માનિશમ્ ॥ ૬॥

કાળામ્ભોદકલાભકોમલતનું બાલેન્દુચૂડં વિભું
બાલાર્કાયુતરોચિષં શરલસત્કોદણ્ડબાણાન્વિતમ્ ।

વીરશ્રીરમણં રણોત્સુકમિષદ્રક્તામ્બુભૂષાઞ્જલિં
કાલારાતિસુતં કિરાતવપુષં વન્દે પરં દૈવતમ્ ॥ ૭॥

સાધ્યં સ્વપાર્શ્વેન વિબુદ્ધ્ય ગાઢં
    નિપાતયન્તં ખલુ સાધકસ્ય ।
પાદાબ્જયોર્મણ્ડધરં ત્રિનેત્રં
    ભજેમ શાસ્તારમભીષ્ટસિદ્ધ્યૈ ॥ ૮॥

॥ ઇતિ શાસ્તુઃ ધ્યાનાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran
Appreciation : Mrs. Chandra V. Ramani and Sri TB Lakshmana Rao Guruji

---

*shAstuH dhyAnAShTakaM*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*